## Abstract No 09

# अर्थक्रियाज्ञानेन प्रतीत्यसमुत्पादसिद्धिः।


**बर्ट्रम्जी. लियनगे**

liyanagebg@gmail.com



प्रमाणस्यार्थक्रियाज्ञानेन व्यवहारेण सिद्धिरिति सांव्यवहारिकत्वं प्रामाण्यस्य बौद्धानाम्। विज्ञप्तिमात्रेऽपि कल्पितात्मना धर्मनैरात्म्यप्रवेशो न च बुद्धविषयमात्रानभिलाप्यात्मवशेनैवैतस्य परमार्थे संवृतिग्रहणात्। प्रामाण्यं व्यवहारेणेति धर्मकीर्तिमतं तदनुरूपम्। न प्राप्यकारित्वं प्रामाण्यस्याभ्युपगम्याद्भावीभूतक्षणानामनन्तरमर्थं प्रापयति त्वपवादोऽत्र। अर्थाधिगतिरेव प्रापकत्वमिति क्वचित् स्वरूपप्रतिपत्तिः सा। अन्यथा प्रमेयभूतार्थप्रापकत्वं तु भावीभूतक्षणानामन्वीगतः सांव्यवहारिकत्वमेवेष्यते। यतोऽस्मिन् सतीदं भवतीति प्रवचनपूर्वककार्यकारणभावोऽनुपपत्तेश्चेत्। नयुक्तम्। उक्तो हि भगवता सांव्यवहारिकत्वेनैव कार्यकारणभावो न तु तत्त्वतः। कारणभावीक्षणे चोत्पन्नस्य यस्या विषयाकारधियोऽत्यन्ताभावात् कार्यक्षणस्य, न प्रतीयते कार्यकारणभावस्य तत्त्वनिबन्धनता, कारणक्षणस्य कार्यक्षणे परोक्षत्वात्। अतो भावीभूतक्षणानामेकत्वं विकल्पज्ञानेनानुमीयते साक्षाद्व्यापारायोगात्। अन्यथा कार्यकारणभाव आत्मकल्पना। सर्वधर्मा अनात्मेति कृत्वा श्रावकयानिकानां बुद्धवचनानुरूपधर्मनैरात्म्यविरुधत्वञ्च। ततः प्रतीत्यसमुत्पादस्यापि विकल्पप्रतिब-द्धस्यार्थक्रियाज्ञानेन सिद्धिः।



**मुख्यपदानि**– प्रतीत्यसमुत्पादः, कार्यकारणभावः, आत्मकल्पना, अर्थक्रियाज्ञानम्, धर्मनैरात्म्यम्